BAGNAN COLLEGE ESTD 1954 Bagnan, Howrah

# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-11**

**(Vedic Literature : Saṃhitās and Brāhmaṇas)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Unit - I**

**(Marks : 40)**

1. ऋक्संहितायाः प्रथमसूक्ते कति मन्त्राः सन्ति? तत्र कः ऋषिः, का देवता, किं वा छन्दः? सूक्तगतदेवतायाः स्वरूपवैशिष्ट्यं पर्यालोच्यताम्। 1+1+1+1+6

*अथवा*

"कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम"— अत्र कः ऋषिः, का च देवता? "कस्मै" इत्यनेन पदेनात्र कोऽवगन्तव्यः? सूक्तस्यास्य दार्शनिकं तात्पर्यं निरूप्यताम्। ½+½+3+6

2. निम्नोद्धृतेषु यथाभिमतम् ***एकतमस्य*** मन्त्रस्य **सुरगिरा देवनागरलिप्या** च व्याख्या कार्या। 6×1

(a) स नः॑ पि॒तेव॑ सू॒नवे–
ऽग्ने॑ सूपाय॒नो भ॑व।
सच॑स्वा नः स्व॒स्तये॑॥

(b) म॒या सो अन्न॑मत्ति॒ यो वि॒पश्य॑ति॒
यः प्राणि॑ति॒ य ईं॑ शृ॒णोत्यु॒क्तम्।
अ॒म॒न्तवो॒ मां त उप॑ क्षियन्ति
श्रु॒धि श्रु॑त श्र॒द्धि॒वं ते॑ वदामि॥

(c) द्यावा॑ चिद॑स्मै पृथि॒वी न॑मेते॒
शुष्मा॑च्चिदस्य॒ पर्व॑ता भयन्ते।
यः सोम॒पा नि॑चि॒तो वज्र॑बाहु॒–
र्यो वज्र॑हस्त॒ः स जना॑स॒ इन्द्रः॑॥

3. अधोदत्तानां विषयाणां मध्ये यथेच्छं ***द्वितयम***वलम्ब्य विनियोगगता संक्षिप्ता टीका विरचनीया। 3×2

स्विष्टकृद्यागः, अभिप्लवषडहः, याज्या, निविद्धानीयम्।

4. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 4×2

(a) अग्निनां रयिमंश्नवत्
पोषंमेव दिवेदिवे।
यशसं वीरवंत्तमम्॥

(b) यो जात एव प्रंथमो मनंस्वा–
न्देवो देवान् क्रतुंना पर्यभूषत्।
यस्य शुष्माद्रोदंसी अभ्यंसेतां
नृम्णस्यं मह्ना स जंनास इन्द्रंः॥

(c) मित्रं कृंणुध्वं खलुं मृळतां नो
मा नों घोरेणं चरताभि धृष्णु।
नि वोनुमन्युर्विशतामरांति–
रन्यो बंभ्रूणां प्रसिंतौ न्वस्तु॥

(d) अहं सोमंमाहनसं बिभं–
र्म्यहं त्वष्टांरमुत पूषणं भगंम्।
अहं दंधामि द्रविंणं हविष्मंते
सुप्राव्ये ३ यजंमानाय सुन्वते॥

5. **एकतरस्य** मन्त्रस्य पदपाठः प्रदर्श्यताम्। 5×1

2(a) अथवा 4(b)।

6. अधोदत्तेषु यथामति ***पञ्चानां*** वैदिकपदानां लौकिकरूपाणि **देवनागरलिप्या** प्रदर्श्यन्ताम्। 1×5

रुद्रेभिः, अश्नवत्, विश्वा, जनासः, कृणोमि, दाधार, सुमेधाम्।

**Unit - II**

**(Marks : 15)**

7. निम्नोद्धृतेषु यथाभिमतं कस्य***चिदेकस्य*** मन्त्रस्य **सुरगिरा देवनागरलिप्या** च व्याख्या कार्या। 7×1

(a) या ते रुद्र शिवा तनूरघोराऽपांपकाशिनी।
तयां नस्तन्वा शन्तंमया गिरिंशन्ताभिचांकशीहि॥

(b) असंबाधं मध्यतो मानवानां
यस्यां उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्त्ति
पृथिवी नः प्रथतां राध्यतां नः॥

8. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 4×2

(a) शिवेन वचसा त्वा गिरिशाऽच्छावदामसि।
यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्॥

(b) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

(c) यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा॥

**Unit - III**

**(Marks : 20)**

9. (a) "ततस्त्वा पारयितास्मीति"— सन्दर्भोऽयं कुत्र समुपलभ्यते? कस्येयमुक्तिः? स कथं कस्य पारयिता बभूव इति भवदीयपाठ्यांशमाधारीकृत्य समुपवर्ण्यताम्। 2+2+6

***अथवा***

(b) शुनःशेपाख्यानं कुत्र समाम्नायते? किं वा अस्य नामान्तरम्? शुनःशेपः कथं केन कति मूल्येन कस्मै विक्रीतः इति आख्यानमिदमाश्रित्य विव्रियताम्। 2+1+4+1+1+1

10. निम्नोद्धृतेषु यथाभिमतं सन्दर्भ ***द्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य, पश्येच्चेज्जीवतो मुखम्॥

(b) स ह निर्दश आस तं होवाच – निर्दशो न्वभूद् यजस्व माऽनेनेति स होवाच, यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य जायन्तामथ त्वा यजा इति तथेति॥

(c) मनवे ह वै प्रातः अवनेग्यमुदकमाजहुर्यथेदं पाणिभ्यामवनेजनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्यः पाणीऽआपेदे॥

---